# Shri Kalahastishvaraa Ashtakam

# શ્રીકાલહસ્તીશ્વરાષ્ટકમ્ ૧

## Document Information

Text title : Shri Kalahastishvaraa Ashtakam 02 40

File name : kAlahastIshvarAShTakam1.itx

Category : shiva, aShTaka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-40

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# શ્રીકાલહસ્તીશ્વરાષ્ટકમ્ ૧

શ્રીલસદ્વિલાસલોલશેષતલ્પસાયકં
    શૈલકન્યકાસ્યચન્દ્રચન્દ્રિકાચકોરકમ્ ।
ભાલનેત્રવહ્નિદગ્ધપઞ્ચબાણરૂપકં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૧॥

કાલકૂટભીકરાગ્નિકણ્ઠમધ્યધારણં
    કાલકર્મખામ્બુકાશખણ્ડનોગ્રહારિણમ્ ।
કાલમૃત્યુગર્વવલ્લિકાસમૂલદારણં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૨॥

સ્થૂલસૂક્ષ્મનિત્યસત્યશોભિતં શુભોદિતં
    બાલચન્દ્રશેખરં કૃપાસુધારસાકરમ્ ।
લાલિતવ્રતાર્થિલોકબાલકર્ણમૂલકં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૩॥

બાલિકાવિયોગિયોગિભાવપદ્મવાસિતં
    ધાલધલ્યકોટિશીતધામસુપ્રકાશિતમ્ ।
કીલસન્નિભાગ્રશાતશૂલવૃદ્ધગાશિતં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૪॥

ભ્રૂલતાનિરીક્ષણપ્રભૂતલોકજાલકં
    લોલતાદ્રિજાલસત્કપોલ(કન્ધરં) શિવમ્ ।
ખેલસત્પ્રકલ્પિતેન્દ્રજાલતન્ત્રકીલકં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૫॥

વ્યાલમક્ષિકાગ્રરત્નમાતૃકાવિભૂષણં
    કાલસિન્ધુકાસુરારિપઙ્ક (રૂપ)ભૂષણમ્ ।
શીલવર્તનપ્રયુક્તશિષ્ટભક્તપોષણં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૬॥

નીલદેહસેવિતામરાલદેહયાપિતં
    મૂલમન્ત્રકર્ણમૂર્તિમોચનં ત્રિલોચનમ્ ।
શૂલિનં સુવર્ણસિન્ધુમૌલિનં કપાલિનં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૭॥

ક્ષાલિતપ્રભક્તકર્મજાતરોગકર્દમં
    ક્ષાલિકાસનાથમિન્દ્રશૈલરાજકર્દમમ્ ।
જ્વાલિતાત્મરોષભીષકેલિદક્ષનિર્દમં
    કાલહસ્તિનાયકં સુખપ્રદાયકં ભજે ॥ ૮॥

॥ ઇતિ શ્રીકાલહસ્તીશ્વરાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Kalahastishvaraa Ashtakam*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*